**लोक-नीति-चर्चा**

विजय-नाम महा-म्लेच्छानाम् बहुप्रजावान् बहुपत्नीवांश् च व्यापारी गृह-क्रयाच् छैलूष-प्रदर्शनाच् च महाधन्य् अभवत् । स मरून्मत्तैर् अभिभृतां पूर्वतन-म्लेच्छ-राज-पत्नीम् अतिक्रान्त्वा राज-निर्वाचनम् अजयत । सो ऽभवत् म्लेच्छाधिपतिः । विरोधकास् तस्य+अनेकाः । तस्य विजयस्य च पट्टाभिषेकस्यानन्तरं वृष्ट्य्-अन्ते पुत्तिका इवो(उ)त्प्लवन्ते बहवः संक्षोभकाः । संक्षोभकेषु गणेषु सन्ति शैलूष-पुंश्चल्यः क्लीबाः स्त्रीवादिनी-स्त्रिय आपण-भञ्जका नियमोल्लङ्घ-वदिनो ऽपसव्य-मार्गाध्यापका वार्त्ता-विक्रयिकाश् च (प्रेतो राक्षस-पुत्रस्य+अनुषङ्गिनः सदृशा आसन्) । ते सर्वे स्व-तन्त्रेण अल्प-विवेकिनः । ततस् ते कैश् चोदयन्ति च विधीयन्ते चे(इ)ति प्रश्नः । केचिद् वदन्ति सोऽस्ति सोरो-नाम-महाधनी+इति । स बेझो-नाम+अन्तर्-जाल-महाव्यापारी+इत्य् अन्ये वदन्ति । एतान्य् उत्तराणि प्रयेण समुचितानि किं तु गूढं विषयं न स्पृशन्ति ॥

इयम् अस्य विषयस्य मीमांसा । विजयोपनाम-व्यापारी केषां प्रतिनिधिः ? स्व-धन-वर्धनञ् च स्व-सामर्थ्य-भोगश् च तस्य प्रधाने लक्ष्ये । परं तु प्रधाना अनुयायिनस् तस्य सन्ति श्वेत-जात्य्-आधिपत्यवादिनश् च व्यतिरोपिताः श्वेत-कर्मकराश् च विशिष्टाः प्रेतसाधकाश् च । कस्मात् कारणात् ते सर्वे विजयं व्यापारिणं प्रतिसेवन्ते? म्लेच्छानां मध्ये वर्तते एकैक-राक्षस-नाम-संप्रदायः । प्रथमा अनुयायिनस् तस्य+आङ्ग्ल-देशस्य होलदेशस्य मुलैकराक्षसवादिनश् च सामर्थ्य-साधकाः । महाम्लेच्छवर्षस्य विस्तारानन्तरं यूरोपात् तस्मिन् देशे जग्मुः । ते जन-भावेभ्यो राष्ट्र-सीमाभ्यो देशानुसरेभ्यश् च न चिन्तयन्ति व्यवसायिनो ऽर्थसाधकाः । तेषाम् एकराक्षस्वत्वं मतविहीन-वेषं वा (आङ्ग्लानुसारेण “secularism” इति) अपसव्य-मार्ग-वेषं वा गृहीत्वा जनानां मध्ये प्रविशति । एतस्य मतस्य भाणकानां कर्मभ्यः साधारणा जनाः कुप्यन्ति । ते धन-क्षयं कुटुम्ब-क्षतिं समाज-भङ्गं मूल्य-नाशम् अनुभवन्ति । तस्मात् प्रधानात् एकैकराक्षसत्व-विशिष्टैकराक्षसत्वयो रणम् अजायत (विशिष्टैकराक्षसत्वेषु पुराणा भेदास् सन्ति) । ततस् ते प्रति-योद्धारं मृग्यन्ति । विजयो व्यापारिणो भवेन जनस्य कोपं सुलभम् अभिज्ञात्वा नय-योजनां प्रायुङ्क्त । अनयत्र् जना विजयं जयाय ॥

सनातन-देव-साधकेभ्यो किं महत्त्वम् एष-विषयस्य ? एकैक-राक्षसत्वम् अन्यान्य् एकराक्षसानि+इव देव-धर्मस्य रिपुः । “Secularism” इति मार्गेण धर्मस्य नाशम् अन्विषति । स सर्वोन्माद-सम्युक्त-मतविहीन-वेष-भृत्-भूतः । एष हि मार्गो धर्म-विरोधाय म्लेच्छ-मरून्मत्ताभि-सन्धेः ॥

पश्य पश्य सर्वोन्माद-समायोग-पुरुषः । तस्य प्रथमोन्मादैव शिरः । बिल्म्य् अनब्रह्मणा च अमहामदेन च गुप्तः । तत्र वर्तते अब्रह्मा-नामोन्मत्त-जनकस्य दुष्टः सिद्धान्तः । प्रेतोन्माद+आदधाति तस्य निगुढं धर्म-निषूद्यमानं कलेवरम् । राक्षसोन्मादस् तस्य बाहू दारुणव् असि-धारिणौ । महामदस्य वाक्यानि भवन्ति तस्य हस्तघ्नाव् अङ्गुलित्रे च । रुधिरोन्मादो दृढः कवचो दात्र-मुद्गराभ्याम् भूषितः । अधोभागस् तस्य जनानां मन्दता । उपहत-जन-वृद्धिस् तस्य महामुष्कौ । तस्मिन् रक्ते वहति मूष-नामोन्मत्तस्य कुतर्क-पूर्णो दुरागमः । स पिपर्ति नवीकरोति च सर्वोन्मादांश् च तेषान् त्विषश् च । अयम् एव देव-धर्मस्य रिपुर् महान् । यद्य् एतत्र् जानाति तर्हि सहस्राणां वर्षाणाम् अज्ञानं लयति ॥